क्षीराम्भोधेर्जठरमभितो देहभासां प्ररोहैः
कालोन्मीलत्कुवलयदलाद्वैतमापादयन्तम् ।
आतन्वानं भुजगशयने कामपि क्षौमगौरे
निद्रामुद्रां निखिलजगतीरक्षणे जागरूकाम् ॥ १४ ॥

क्षीरेति । पुनर्देहभासां निजशरीरकान्तीनां प्ररोहैरङ्कुरैः क्षीराम्भोधेः क्षीरसमुद्रस्य । 'रूढिर्योगमपहरति' इति न्यायेन योगाद्रूढेर्बलीयस्त्वादिति भावः । जठरमभितः । मध्यप्रदेशस्य समन्तादित्यर्थः । 'सलिलमभितः' इत्यपि पाठः । 'अभितःपरितः–'इत्यादिना द्वितीया । काले चन्द्रोदयकाल उन्मीलन्ति विकसन्ति यानि कुवलयदलानि नीलोत्पलपत्राणि तैरद्वैतमभेदम् । तत्सादृश्यमित्यर्थः । आपादयन्तं संपादयन्तम् । कालग्रहणं दलानामम्लानत्वद्योतनार्थम् । निजदेहकान्तिच्छटाभिः क्षीरार्णवस्य नीलवर्णतां जनयन्तमित्यर्थः । एतेन श्रीमहाविष्णुदेहस्येन्द्रनीलसादृश्यं सूच्यते । तदुक्तम्—'क्षीरमध्ये क्षिपेन्नीलं क्षीरं चेन्नीलतां व्रजेत् । स इन्द्रनीलो विज्ञेयः सर्वसौख्यकरः शुभः ॥' इति रत्नशास्त्रवचनात् । अतएव क्षीरस्य स्वधवलिमपरित्यागेनान्यनीलिमस्वीकरणोक्तेस्तद्गुणालंकारः । 'तद्गुणः स्वगुणत्यागादन्योत्कृष्टगुणाहृतिः' इति लक्षणात् । तथा क्षौमवद्दुकूलवद्गौरे सित इत्युपमा । 'गौरोऽरुणे सिते पीते' इति विश्वामरौ । भुजगशयने शेषपर्यङ्के निखिलजगतीनां सकललोकानां रक्षणे पालने जागरूकां जाग्रतीम् । सावधानामित्यर्थः । 'जागरूकः' इत्यूकप्रत्ययः । अतएव कामप्यनिर्वाच्याम् । लोकविलक्षणत्वादिति भावः । निद्रामुद्रां योगनिद्रावस्थामातन्वानमनुकुर्वाणम् । तनोतेः शानच् ॥

अथ नृसिंहावतारं वर्णयति—

प्रह्लादस्य व्यसनममितं दैत्यवर्गस्य दम्भं
स्तम्भं वक्षःस्थलमपि रिपोर्यौगपद्येन भेत्तुम् ।
बद्धश्रद्धं पुरुषवपुषा मिश्रिते विश्वदृष्टे
दंष्ट्रारोचिर्विशदभुवने रंहसा सिंहवेषे ॥ १५ ॥

प्रह्लादस्येति । अमितमपारं प्रह्लादस्य हिरण्यकशिपुतनयस्य निजभक्ताग्रेसरस्य व्यसनं समुद्रपातनसर्पदंशनादि तत्पितृकृतविपदम् । 'व्यसनं विपदि भ्रंशे' इत्यमरः । तथा दैत्यवर्गस्य हिरण्यकशिपुमुखासुरनिकरस्य दम्भं मायाडम्बरं स्तम्भमयोमयस्तम्भं च रिपोर्वक्षःस्थलमप्युरःस्थलमपि । अपिशब्दः समुच्चये । यौगपद्येनैकवारमेव । न तु कालक्रमेणेत्यर्थः । भेत्तुं विदारयितुं पुरुषवपुषा नरशरीरेण मिश्रिते मिलिते अतएव विश्वदृष्टेऽत्याश्चर्यतया विश्वजनालोकिते दंष्ट्राणां दन्तविशेषाणां रोचिर्भिः कान्तिभि-

१. 'क्षीराम्बोधेः' इति पाठः.

विशदानि शुभ्राणि भुवनानि कुक्षिस्थलोका यस्य तस्मिन्सिंहवेषे सिंहाकारे रंहसा वेगेन बद्धश्रद्धं विहितादरम् । नरसिंहरूपेणावतीर्णमित्यर्थः । ददर्शेति पूर्वेण संबन्धः । उक्तं च श्रीभागवते—'भक्तप्रतिज्ञापरिपालनाय सर्वात्मताव्याप्तिविवर्तनाय । दैत्येन्द्रवक्षोदलनाय विष्णुः स्तम्भान्नृसिंहाकृतिराविरासीत् ॥' अत्र क्रमिकस्य स्तम्भादिविदारणस्य यौगपद्यासंबन्धेऽपि तत्संबन्धोक्तिरतिशयोक्तिभेदः ॥

**नारायणाय नलिनायतलोचनाय**
**नामावशेषितमहाबलिवैभवाय ।**
**नानाचराचरविधायकजन्मदेश-**
**नाभीपुटाय पुरुषाय नमः परस्मै ॥ १६ ॥**

**नारायणायेति ।** नारायणाय परमात्मने । तदुक्तम्—'नारायणः परोऽव्यक्ता दण्डमव्यक्तसंभवः' इति । यद्वा नरस्य संबन्धीनि नाराणि तत्त्वानि तान्ययनं स्थानं यस्य नारायणः । तदुक्तम्—'नराज्जातानि तत्त्वानि नाराणीति विदुर्बुधाः । तस्य तान्ययनं पूर्वं तेन नारायणः स्मृतः ॥' इति । अथवा नारा आपोऽयनं यस्य तथा । 'अत एवार्णवे तस्मिन्यत्तदस्यायनं गताः । नारास्ताः सृष्टिकरणास्तेन नारायणः स्मृतः ॥ आपो नारा इति प्रोक्ता आपो वै नरसूनवः । तस्य तास्त्वयनं पूर्वं तेन नारायणः स्मृतः ॥' इत्यादिना । नारा इत्यत्राजादित्वात्सिद्धं आर्षो वा ङष्भावः । तस्मै नारायणाय । नलिनायतलोचनाय पुण्डरीकविशालाक्षाय । नाम्ना नाममात्रेणावशेषितमवशेषवत्कृतं महद्भूयिष्ठं बलिवैभवं वैरोचनी संपद्येन तस्मै । वामनावतारे बलिं पादेनाक्रम्य पाताले निक्षिप्तवत इत्यर्थः । नाना बहुप्रकारं चराचरं स्थावरजङ्गमात्मकं जगत् । 'चराचरं स्याज्जगति' इति विश्वः । तस्य विधायको निर्माता ब्रह्मा तस्य जन्मदेशो जन्मस्थानं नाभीपुटं नाभीपद्मकोशं यस्य तस्मै परस्मै पुरुषाय परमपुरुषाय नमः । 'नमः-स्वस्ति–' इत्यादिना चतुर्थी । तथा च श्रीभागवते—'नतोऽस्म्यहं त्वाखिलहेतुभूतं नारायणं पूरुषमाद्यमव्ययम् । यन्नाभिजातादरविन्दकोशाद्ब्रह्माविरासीद्यत एष लोकः॥' इत्युक्तत्वात् । वसन्ततिलकावृत्तम् ॥

**इति प्रणम्योत्थितानेतान्स्तुतिरवमुखरितहरिन्मुखान्हरिहयप्रमुखानखिलानमरान्[1]अरुणारुणतामरसविलासचोरैर्लोचनमरीचिसंतानै[2]रानन्दयन्नरविन्दलोचनः स्फुटमभाषत ।**

**इतीति ।** इत्युक्तप्रकारेण प्रणम्य साष्टाङ्गप्रणामं कृत्वोत्थितानुत्थानं प्राप्तान्स्तुतिरवैस्तारतरस्तोत्रध्वनिभिर्मुखरितानि प्रतिध्वनिवशान्मुखरीकृतानि हरितां दिशां मुखानि प्रदेशा एव मुखानि वदनानि येषां तान्हरिहयप्रमुखानिन्द्रादीन् । 'जम्भभेदी हरिहयः'

१. 'अमरगणानरुणतामरस' इति पाठः. २. 'मरीचिवीचिसंचारैः' इति पाठः.